# ॥ आर्यादुर्गाष्टकम् ॥

## .. AryAdurgAShTakam ..

sanskritdocuments.org

August 20, 2017

# .. AryAdurgAShTakam ..

# ॥ आर्यादुर्गाष्टकम् ॥

## Sanskrit Document Information

Text title : AryAdurgAShTakam

File name : AryAdurgAShTakam.itx

Category : devii

Location : doc_devii

Author : Anantakavi

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description-comments : Brihatstotraratnakara 2, Narayana Ram Acharya, Nirnayasagar, stotrasankhyA 225-425

Latest update : February 10, 2017

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ आर्यादुर्गाष्टकम् ॥

श्रीगणेशाय नमः ॥

आर्यादुर्गाऽभिधाना हिमनगदुहिता शङ्करार्धासनस्था
    माता षाण्मातुरस्याखिलजनविनुता संस्थिता स्वासनेऽग्र्ये ।
गीता गन्धर्वसिद्धैर्विरचितबिरुदैर्याऽखिलाङ्गेषु पीता
    संवीता भक्तवृन्दैरतिशुभचरिता देवता नः पुनातु ॥ १॥

मातस्त्वां साम्बपत्नीं विदुरखिलजना वेदशास्त्राश्रयेण
    नाहं मन्ये तथा त्वां मयि हरिदयितामम्बुजैकासनस्थाम् ।
नित्यं पित्रा स देशे निजतनुजनिता स्थाप्यते प्रेमभावात्
    एतादृश्यानुभूत्यो दधितटसविधे संस्थितां तर्कयामि ॥ २॥

नासीदालोकिता त्वत्तनुरतिरुचिराऽद्यावधीत्यात्मदृष्ट्या
    लोकोक्त्या मे भ्रमोऽभूत्सरसिजनिलये नामयुग्माक्षरार्थात् ।
सोऽयं सर्वो निरस्तस्तव कनकमयीं मूर्तिमालोक्य सद्यः
    साऽपर्णा स्वर्णवर्णार्णवतनुजनिते न श्रुता नापि दृष्टा ॥ ३॥

श्रीसूक्तोक्ताद्यमन्त्रात्कनकमयतनुः स्वर्णकञ्जोच्चहारा
    सारा लोकत्रयान्तर्भगवतिभवतीत्येवमेवागमोक्तम् ।
तन्नामोक्ताक्षरार्थात्कथमयि वितथं स्यात्सरिन्नाथकन्ये
    दृष्टार्थे व्यर्थतर्को ह्यनयपथगतिं सूचयत्यर्थदृष्ट्या ॥ ४॥

तन्वस्ते मातरस्मिञ्जगति गुणवशाद्विश्रुतास्तिस्र एव
    काली श्रीर्गौश्च तासां प्रथममभिहिता कृष्णवर्णा ह्यपर्णा ।
लक्ष्मीस्तु स्वर्णवर्णा विशदतनुरथो भारती चेदमूषु
    स्वच्छा नोनापि कृष्णा भगवति भवती श्रीरसीत्येव सिद्धम् ॥ ५॥

नामाद्यायाः स्वरूपं कनकमयमिदं मध्यमायाश्च यान-
    मन्त्यायाः सिंहरूपं त्रितयमपि तनौ धारयन्त्यास्तवेदृक् ।
दृष्ट्वा नूत्नैव सर्वा  व्यवहृतिसरणीरिन्दिरे चेदतर्क्या
    त्वामाद्यां विश्ववन्द्यां त्रिगुणमयतनुं चेतसा चिन्तयामि ॥ ६॥

त्वद्रूपज्ञानकामा विविधविधसमाक्लृप्ततर्कैरनेकै-
    र्नो शक्ता निर्जरास्ते विधि-हरि-हरसंज्ञा जगद्वन्द्यपादाः ।

का शक्तिर्मे भवित्री जलनिधितनये ज्ञातुमुग्रं तवेदं
    रूपं नाम्ना प्रभावादपि वितथफलो मे बभूव प्रयत्नः ॥ ७॥

अस्त्वम्ब त्वय्यनेकैरशुभशुभतरैः कल्पितैरम्ब तर्कै-
    रद्याहं मन्दबुद्धिः सरसिजनिलये सापराधोऽस्मि जातः ।
तस्मात्त्वत्पादपद्मद्वयनमितशिरा प्रार्थयाम्येतदेव
    क्षन्तव्यो मेऽपराधो हरिहरदयिते भेदबुद्धिर्न मेऽस्ति ॥ ८॥

आर्यादुर्गाष्टकमिदमनन्तकविना कृतम् ।
तव प्रीतिकरं भूयादित्यभ्यर्थनमम्बिके ॥ ९॥

इति श्रीमदनन्तकविविरचितमार्यादुर्गाष्टकं सम्पूर्णम् ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. AryAdurgAShTakam ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XeLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*